International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(4): 99-105
© 2025 IJMH
www.themultijournal.com
Received: 16-08-2025
Accepted: 25-08-2025
Publish : 26-08-2025

**आचार्य चक्रवर्तिरङ्गनाथन्**
साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**आचार्य चक्रवर्तिरङ्गनाथन्**
साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# रामायणे वनस्पतिविज्ञानम्

**आचार्य चक्रवर्तिरङ्गनाथन्**

**सारांशः**

**प्रस्तावना**

आधुनिककाले वनस्पतिविज्ञानविषये वैज्ञानिकाः बहु गवेषणं कुर्वन्ति। वस्तुतः अस्माकं पूर्वजाः स्वकीयेषु ग्रन्थेषु वनस्पतिविषये बहु चर्चां कृतवन्तः, कुर्वन्तः अपि सन्ति। वनस्पतिरेव अस्माकं महती संपद् भवति। तद्विना भूमेः शोभा न भवत्येव। अतः अस्मिन् शोधपत्रे रामायणान्तर्गतवनस्पतिविषये किञ्चित् प्रस्तूयते।

**कूजन्तं रामरामेति मधुरं मधुराक्षरम्।**
**आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम्॥ (श्रीरामरक्षास्तोत्रम् -३४ श्लोक)**

इत्यत्र शाखा शब्दः प्रयुक्तः अस्ति। वृक्षशाखाः इति।

- एवं द्वितीयः भागवन्तं साक्षात् एवं वदन्ति –

**"निवासवृक्षस्साधूनां आपन्नानां परा गतिः"। रामायण (४-१५-१९)**

भगवन्तमेव साक्षात् वृक्षरूपेण वदन्ति इति महान् विषयः।

- एवं "नैमिषारण्ये तत्र भगवान् वनरूपी जनार्दनः" इत्येवं रूपेण कीर्तयन्ति।
- "चैत्रःश्रीमान् अयं मासः पुण्यः पुष्पितकाननः" **(अयोध्या-३-४)** इति एकः श्लोकः विद्यते।
- तदनन्तरं "सप्तशालभञ्जनम्" इति एकः विषयः।

सप्तशालवृक्षाः तत्र भगवता रामेण एकैनैव शरेण तत्र भञ्जिताः इति रामायणे अस्ति। एते वृक्षाः कथं भवन्ति इति जानन्ति वा।

एकदैव समानरूपेण न भवन्ति, एतेषां सह सुग्रीवः किमर्थम् एवं परीक्षां कृतवान् नाम एकैकस्यापि वृक्षस्य एकैकं शरमुपयुज्य सः करोति इति चिन्तितवान्, किन्तु एकेनैव शरेण सः एवं भञ्जितवान्। वस्तुतः अत्र कः विषयः इति चेत् एकः राक्षासः सः सर्परूपेण अस्ति। तस्य स्कन्धे एते वृक्षाः तावत् सन्ति, तर्हिः सर्पः कथं भवति भोः इति चेत् एकदैव न भवति किन्तु वक्ररूपेण भवति। तर्हि एतेषां वृक्षाणां भञ्जनं कथं कर्तुं शक्यते नाम एकदैव भवति चेत् एव कर्तुं शक्यते तदानीं रामः लक्ष्मणम् अपश्यत्। किमर्थमित्युक्ते लक्ष्मणः सम्प्रदाये आदिशेषावतारः इति कृत्वा सर्पस्य सर्वं विषयं सर्पः एव जानाति। "अहिरेव अहेः पादान् विजानाति" इत्युक्तरीत्या लक्ष्मणः अस्य सर्परूपराक्षासस्य पादः कुत्र अस्ति इति ज्ञातवान्। सपद्येव एकमुपायं रामस्य कृते सूचीतवान्। अर्थात् एकवारं पादस्य कोणे यदि वयं पादं स्थापयामश्चेत् तदानीम् एकदा भवति। लक्ष्मणस्यादेशानुसारं रामः एकेनेव शरेण सप्तवृक्षान् बभञ्ज। अनन्तरं "वृक्षैव स्तब्धो दिवि तिष्ठति"**(श्वेताश्वतरोपनिषद-३.९)** इति उपनिषद् वाक्यम् भगवन्तं वृक्षरूपेण वदन्ति।

- ततश्च एकः विषयः सहस्रनामस्तोत्रे "अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः"।

अमरप्रभुः वा मरप्रभुः वा इत्यत्र अस्ति विचिकित्सा। तमिलभाषायां मरशब्दस्य वृक्षः इत्यर्थः। (मरं वृक्षः इत्यर्थः) कश्चन पण्डितः अरे भवान् महाप्रभुः इति उच्चारणं करोति इदं सम्यग् नास्ति इत्यादिकम् उक्तवान्। स तु तदारभ्य विष्णुसहस्रनामपारायणमेव स्थगितवान्। भगवान् तस्य पण्डितस्य स्वप्ने आगत्य अरे किं चिन्तयति भोः भवान् किमर्थं सहस्रनामपारायणं न करोति। मरस्यापि प्रभुः अहमेव किल, तर्हि कथं भवान् एवं वदति इत्येवं रूपेण तर्जितवान्। अतः भगवान् साक्षात् वृक्षः। अतः एव

भवन्तः चिन्तयन्तु। भगवन्तं कल्पवृक्षरूपेणापि कवयः वदन्ति। भगवन्तं पारिजातवृक्षेणापि वदन्ति। भगवन्तं हरिचन्दनवृक्षेणापि वदन्ति। भगवतीं तावत् कल्पलतारूपेण वर्णयन्ति। एवं भगवतः तत्र वृक्षैः सह लताभिस्सह गरिष्ठः अविनाभावसम्बन्धः अस्ति इति अस्माभिः ज्ञातुं शक्यते।

ततश्च रामलक्ष्मणौ किष्किन्धां प्रति गच्छतः। तदानीं सुग्रीवः रामस्य कृते आसनं दत्तवान्। रामः उपविष्टः। हनुमतः महान् कोपः आगतः। अरे लक्ष्मणस्य कृते अयम् आसनं न दत्तवान्। झटिति हनुमान् किं कृतवान्, तत्र विद्यमानं चन्दनवृक्षं किञ्चित् भञ्जनं कृत्वा लक्ष्मणस्य कृते चन्दनकाष्ठनिर्मितम् आसनं दत्तवान्। अत्र सूक्ष्मं जानन्ति वा इति चेत् लक्ष्मणस्य पूर्वमेव सुग्रीवस्य विषये कोपः विद्यते। अनेन अत्यन्तं कुपितः सः। अयं लक्ष्मणः आदिशेषावतारः सर्पः भवति। अतः सर्पस्य तावत् चन्दनवृक्षः अत्यन्तम् इष्टः भवति, तेन शान्तः भवति इति कृत्वैव तत्र चन्दनकाष्ठं तत्र आसनरूपेण दत्तवान्। इति एकः विषयः।

ततश्च भागवतापचारः। सुग्रीवस्य वालिनश्च मध्ये महत् युद्धं चलति। सुग्रीवः रामस्य कृते शरणागतिं तत्र कृतवान्। अनन्तरम् एकस्मिन् समये कः तत्र वाली कः सुग्रीवः इत्यत्र रामस्य आसीत् संशयः। तदानीं वालिसुग्रीवयोः मध्ये महत् युद्धं जातम्। युद्धरङ्गे सुग्रीवः व्रणादियुक्तः सन् श्रीरामसमीपम् आगतवान्। अत्र सुग्रीवस्य किम् एतादृशं दण्डनम् इति चेत् एतत् कारणम्-सुग्रीवः लक्ष्मणस्य कृते आसनं न दत्तवान् किल, तदानीं भागवतापचारः अनेन कृतः। अतः सुग्रीवः भागवतापचारफलम् आदौ प्राप्नोतु इति कृत्वा रामः तूष्णीमासीत्। अनन्तरं सुग्रीवः कः वाली कः इत्यत्र हारविशेषेण ज्ञातव्यमिति चिन्तितवान्, तदानीं लक्ष्मणस्य सविधे गजपुष्पमाला इति एका माला अस्ति। गजपुष्पमालां ददातु इति उक्तवान्, यदा मालार्पणं क्रियते तदानीम् अत्यन्तं शिरः अवनमय्य स्वीकुर्वन्ति किल सुग्रीवः, तदानीं स्वशिरः अवनमय्य मालां स्वीकृतवान्, भगवत अपचारस्य फलं यदासीत् सः शान्तः इति एकः विषयः अस्ति।

वस्तुतः रामायणमेव एकः वृक्षः भवति। तत्र तस्य वृक्षस्य मारीचः एव बीजं भवति। मारीचं तावत् सम्यग् रामः समुद्रे पातितवान्। द्वादशवर्षानन्तरं तस्य बीजस्य तावत् उत्पत्तिः रामायणवृक्षरूपेण आसीदिति वदन्ति।

यदा सीतान्वेषणं कुर्वन् हनुमान् लङ्कानगरं प्रविष्टवान् अशोकवने वृक्षस्य अधः सीता आसीत्, हनुमान् शिंशुपावृक्षे आसीत्, कारणं किमित्युक्ते शिंशुपावृक्षस्य वर्णः हनुमतः वर्णः समानः इति कृत्वा तत्र भवति चेत् अयं दृष्टिगोचरः न भवति इति कृत्यैव एवमासीत्।

एवमेव अन्यत्र - "अभिवृक्षाः परिम्लानः" इति एकः श्लोकः विद्यते। नाम रामस्य वनवाससन्दर्भे वृक्षाः अपि अत्यन्तं दुःखिताः आसन् इति एकः विषयः।

अन्यः मुख्यः विषयः भवति रामराज्ये ये तावत् आसन् तेषां सर्वेषामपि परमपदप्राप्तिः जाता। न केवलं मनुष्याणाम् अपितु तत्र विद्यमानानां वृक्षाणाम्, शाखानाम्, एवं जन्तूनाम्, पर्वतानां सर्वेषामपि एवमासीदिति अस्ति गाथा।

एवंरूपेण "रामायणे वनस्पति विज्ञानम्" इति विषयः।

**ओषध्यास्ते मूलं मा हिंसिषम्॥ (यजुर्वेदः-२.२५)**
**वायुगोपा वै वनस्पतयः। (मैत्रायणी संहिता - ३-९-४)**

वृक्षः जीवनतत्त्वम्। वृक्षान् विहाय कथं वा प्राणाः। वृक्षाणां समाहार एव महारण्यम्। महारण्यानां सुरक्षा नाम वृक्षाणां सुरक्षा। तदर्थम् उच्यते किल वृक्ष एव जीवनमिति। तथैव वृक्षो रक्षति रक्षितः इति। संसारे नैवास्ति कोऽपि जीवः यस्मै वृक्षः न रोचते। तत्र आसेतु-हिमाचलविस्तृतस्य महारण्यस्य आत्मा भवति वृक्षः। महीधराः महारण्यस्य बलिष्ठाः पुत्राः। कलकलनिनादवत्यः सरितः कानन-कन्यकाः। व्याघ्र-सिंह-गजादयः समस्तपशवश्च तस्य भ्रातरः। पिकवध्वोमयूर्य्यश्च भगिनीभिः कुररीभीरममाणाः राजन्ते। यस्मिन् महारण्ये समवेताः सकलनभश्चुम्बिनो महीरुहाः लतावधू-शाखाकरसमालिङ्गिताः विश्वजीवनशक्तिप्रदायिन्याः शाश्वतसुन्द-र्याः प्रकृतिदेयाः ललितसन्तानविशेषाः। पुष्पाणि-फलानि च महारण्ये स्थितायाः प्रकृत्याः चारुभूषणानि। बनान्तनिर्झरीणी स्वच्छजलराशिं प्रवाह्यन्ती प्रकृतिदेयाः चरणक्षालनपरा राजते। प्रकृतेः शान्तिस्थितिः न महारण्यमन्यत्र कुत्रापि वर्तते। असीम-सौन्दर्यशालिनी तां प्रकृतिं को वा वर्णयितुं क्षमः। सत्य-शिव-सुन्दरस्य च परमं मिलनस्थलं महारण्यम्। तत्र पुनः षड् ऋतूणां समवेतसमागमः पूर्णिमाकाशे शशधरसम्पूर्णश्रियसतारकपूर्णचन्द्र-त्वमावहति।

प्रकृतिप्रियोऽयं साधारणकविः अनतिरसाधारण्याः प्रकृतेः वर्णनाय स्तोकं प्रयासमकरोत्। प्रकृतिरेव परमात्मनः सत्ता। दुःखप्रपीडितः जनः प्रकृतौ एव सुखस्य अनुसन्धानं करोति तथा तत्रैव परमसुखं लभते। विशेषतया वसन्त-ग्रीष्म-वर्षा-शरद्-हेमन्त-शिशिरादयः षड्ऋतवः यदा अरण्ये स्व गुणविभावान् विभान्ति तदा तत् सौन्दर्यसंलग्नाः देवमानवाश्च स्वर्गसुखमपि विस्मरन्ति। अतः काननं न कदापि मानवः नाशयेदिति काव्यस्यास्य वर्णितः विषयसारः।

वस्तुतस्तु आदिकविविरचितं रामायणाख्यं काव्यसमुद्रं यदि आलो-डयामः तर्हि अमूल्यानि वनस्पतिविषयकरत्नानि प्राप्तुं शक्यन्ते। तद्यथा –

**वेदवेद्ये परे पुंसि जाते दशरथात्मजे।**
**वेदः प्राचेतसदासीत् साक्षाद्रामायणात्मना॥(बालकाण्डम्-४.५)**

इति श्रीमद्रामायणम् साक्षात् वेद एव इति सुस्पष्टम्।

1. श्रीमद्रामायणञ्च सर्वविज्ञानभाण्डागाररूपेण विराजते इत्यत्र नास्ति संशीतिलेशः।
२. वस्तुतस्तु अरण्येन सह सर्वेषां महान् सम्बन्धः विद्योतते।
3. अरण्यवासः अत्यन्तं पवित्ररूपेण स्वीक्रियते। महर्षयः, तत्र मुनयः, तापसाः सर्वेऽपि तत्रैव वसन्तः सर्वं साधयन्ति।
4. वनं सर्वं सम्पाद्य ददाति। तत्र विविध वृक्षाणां समवायः अस्माकं जीवनतत्त्वस्य मुख्यभूतः विषयः भवति।

**"ओषध्यास्ते मूलं मा हिंसिबम्"** (इति यजुर्वेदः)

**"वायुगोपा वै वनस्पतयः"** (इति मैत्रायणी संहिता)

वृक्षः जीवनतत्वं भवति। वृक्षान् विहाय कथं वा प्राणाः। वृक्षाणां समाहार एव महारण्यम्। महारण्यानां सुरक्षा नाम "वृक्षाणां सुरक्षा" धर्मो रक्षति रक्षितः इति मया तद्वत् वृक्षो रक्षति रक्षितः।

वस्तुतः संसारे नैवास्ति कोऽपि जीवः यस्मै वनं न रोचते तत्र आसेतु हिमाचलविस्तृतस्य महारण्यस्य आत्मा भवति वृक्षः।

**अरण्यभूमिः सुमनोविलासिनी**
**समस्तजीवप्रमद प्रदायिनी।**
**सुगन्धपूर्णानिलवारिधारिणी**
**बनाननीं नौमि जगद्विमोहिनीम्॥**
**प्रिया यथा कान्तमनोविनोदिनी**
**यथाम्बिका वा जगतां हितैषिणी।**
**प्रसूर्यथा पुत्रमनः प्रसादिनी**
**तथा वनानि मनसां विनोदिनी॥**

इत्येवं रूपेण भावपूर्णर्ं श्लोकान्वयं वनविषये पठामः। श्रीमद्रामायणं प्रति आगच्छामः चैत् आदौ भगवान् वाल्मीकिः चम्पूरामायणे इत्थं स्तुतः -

**अथ सरसिजयोमेराज्ञया रामवृत्तं**
**करबदरसमानं प्रेक्ष्य दृष्ट्या प्रतीच्या।**
**शुभमत काव्यं स्वादु रामायणाख्यं**
**मधुमयभणितीनां मार्गदर्शी महर्षिः॥ इति।**

**(बालकाण्डम्– ८. श्लो)**

तं एवं स्तुवन्ति पण्डिताः -

**कूजन्तं राम रामेति मधुरं मधुराक्षरम्।**
**आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम्॥**

**(श्रीरामरक्षास्तोत्रम्-३४ श्लोक)।**

अर्थात् वृक्षेण सह सम्बद्ध कविताशाखा तत्रस्थः कोकिलसदृशः इत्येवं रूपेण -

**दशकूपसमा वापी, दश वापी समो ह्रदः।**
**दशह्रदसमः पुत्रो, दशपुत्रसमो द्रुमाः॥**
**प्रकृतिमभीक्ष्णं स्मरेत्।**
**धत्ते भरं कुसुमपत्रफलावलीनां**
**धर्मव्यधां हरति शीतभवां रुजं च।**
**यो देह मर्पयति चान्यसुखस्य हेतोः**
**तस्मै वदान्यमुखे तरवे नमस्ते॥ (भामिनीविलासः)**
**छाया मन्यस्य कुर्वन्ति तिष्ठति स्वयमातपे।**
**फलान्यपि परार्थाय वृक्षास्सत्पुरुषा इव॥**

**वनस्पतिः –**

वनस्य पतिः। विना पुष्पं फलिद्रुमः। “अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः”॥ नन्दीवृक्षोऽश्वत्थभेदः प्ररोहो गजपादपः। वनस्पतिः इति संस्कृतपदं यत् इदानीं सम्पूर्णं वनस्पतिराज्यं सूचयति। परन्तु चरकसंहिता, सुश्रुतसंहितवैद्यग्रन्थानां तथा वैशेषिकतत्त्वशास्त्रप्रकारेण वनस्पतिः इत्युक्ते फलानिदीयमानवृक्षेषु एव परिमितं कृतम्। किन्तु सुस्पष्टतया पुष्पाणि न सन्ति। सहस्रशाखैः सदा हरितरूपेण सुवर्णवर्णे कान्तियुक्तेन भवति।

श्रीरामस्य अयोध्यातः लङ्कापर्यन्तं गमनसन्दर्भे चित्रकूट-दण्डकारण्य-पञ्चवटी-किष्किन्धादीनां वर्णनं समुपलभ्यते। साहित्यिकदृष्ट्या रसानुगुणं शान्त-मधुर-रुद्र-बीभत्सादिभेदेन चतुर्धा अरण्यभेदः वर्तते। किन्तु यदि वृक्षशास्त्रदृष्ट्या पर्यालोचयामः तर्हि एवं प्रकारेणापि विभक्तुं शक्यम् -

1. Tropical Deciduous Forest – उष्णकटिबंधीयपर्णपातीवनम्।
2. Tropical dry Deciduous Forest – उष्णकटिबंधीयशुष्कपर्णपातकवनम्।
3. Dry and moist deciduous forest – शुष्कं आर्द्रं च पतलवने।
4. Evergreen tropical forest of Srilanka - श्रीलङ्कायाः सदाहरिद्राउष्णकटिबंधीयवनम्।
5. Himalayan Forest – हिमालयवनम्।

**1. Tropical Deciduous forest / उष्णकटिबंधीयपर्णपातीवनम्-**

चिचकूटवनं महावनमपि उच्यते। वनवासकाले महर्षिभारद्वाजस्य आदेशानुसारेणैव आदौ रामः चित्रकूटे उवास। एवं चित्रकूटस्य उत्तरे मन्दाकिनी भवति। महर्षेः वर्णानानुसारं चित्रकूटवने भोजनप्रदायकम्, काष्ठप्रदायकं चेति द्विविधवृक्षविशेषः दरीदृश्यते।

भोजन प्रदायके - आम्र-विल्व-पनस-भाव्यादि तदितरे - निम्ब-आसन-विजिका-मधूक-वेणु

एतेषां वर्णनं – 2.5.29, 2.94.4-13, 2.94.18

अनन्तरं दण्डकारण्यम् अस्य विस्तृतिः मध्यप्रदेश-ओडिशा-आन्ध्रप्रदेशस्य अंशविशेषे लभ्यते।

**दण्डकारण्यमिति विषये निविधमतानि -**

1. दण्डकराक्षस्य नामानुसारेण
2. दण्ड इति दीर्घतृणसदृशस्य उपस्थितिः आसीत्, अतः
3. दण्डः इत्युक्ते वृक्षाणां पङ्क्तिः

अरण्यकाण्डे अरण्यारण्यस्य वर्णनप्रसङ्गे दृश्यते

**“आरण्यैश्च महावृक्षैः पुण्यैः स्वादुफलैवृतम्”॥**

अस्मिन् अरण्ये मुख्यतः दर्भतृणम्, मधुकवृक्षः, शालः, अश्वकर्णः, ककूभः, तिण्डुकुः, वद्रि इत्येतेषामुल्लेखः वर्तते।

**2. Tropical Dry deciduous forest / उष्णकटिबंधीयशुष्कपर्णपातकवनम्**

पञ्चवटीवनमस्योदाहरणम्। अत्रैव सीता परित्यक्ता आसीत्, गोदावरीतीरे सुस्थितं वतनमिदम्। फल-पुष्प-सुगन्धिप्रदायकवृक्षाणां परिचयः लभ्यते। यथा तमाल-केतकी-अशोक-चम्पक-आम्र-नीप-पनस- रवधीर-किंशुकादीनां उल्लेखः वर्तते।

**3. Dry and moist Deciduous Forest/**शुष्कं आर्द्रं च पतलवने-

पम्पासरोवरस्य तीरे अवस्थितानां वृक्षाणां ग्रहणं भवतीत्यत्र। आधुनिककाले कर्णाटकराज्ये भवति। मुख्यरूपेण जाम्बु-परियाल-पलाकस-पनस-पिप्पल-आम्र-रक्तचन्दन-नागरकेसरी-तिलक-कदम्ब-करवी-अग्निमुख्य-पुन्नाग-वञ्जुला-वकूल-चम्पकादीनां वृक्षाणां वर्णनं दृश्यते।

**4. Himalayan Forest / हिमालयवनम् -**

कैलास-रिषभपर्वतयोः मध्ये अवस्थितमिदम्, युद्धकाण्डे वर्णितम्। लक्ष्मणाय हनुमान् सुषेणेन प्रेरितः आसीत्। सुषेणस्य निर्देशानुसारेण विशल्यकरणी, सुवर्णकरणी आनेतुं द्रोणगिरौ गतवान्।

**5. Evergreen Forest of lanka/श्रीलङ्कायाः सदाहरिद्राउष्णकटिबंधीयवनम् -**

अशोकवनम् - तत्र मुख्यतः- सरला, कर्णिकरः, कुरजा, केतकी, नीपः, प्रियङ्गुः, आसनः, कविदरः, करवीरः, इत्यादीनां परिचयः लभ्यते।

एतद्विहाय एवं रूपेणापि वृक्षाणां विभाजनं भवितुं शक्यम्-

1. भोज्य - अभोज्यवृक्षाणां परिचयः।

२. पवित्रवृक्षः - रथ्यवृक्षः, देवताधिष्ठानवृक्षः। यथा अशोकवृक्षः। दण्डकारण्ये यथा पवित्रः तथैव श्रीलङ्कायामपि।

3. अर्थनैतिकदृष्ट्या महत्वपूर्णवृक्षः -

a)पुत्तागः, वेणुः- सेतुनिर्माणे

b)वकुलः – सेतुः

c)आम्र – भोजनम्

4. औषधीवृक्षः - युद्धकाण्डे-द्रोणगिरौ-मृतसञ्जीवनी, विशल्यकरणी, सुवर्णकरणी। अपि च चित्रकूटे श्वेतकण्डकरी-ब्राह्मी-कूटक-ह्रीलमोचिकादीनाम् उल्लेखः दृश्यते।

A. किं पुष्पं कस्मिन् काले भवति, तस्य उल्लेखः दृश्यते।

यथा - अशोकः वसन्ते, पर्वताञ्चले अधिकं दृश्यते।

मधुकः - वसन्ते

आम्रमञ्जरी - वसन्ते

**श्रीमद्रामायणे अयोध्याकाण्डे चित्रकूटपर्वतशोभा- सर्वेषां पाठकानां सौकर्याय ज्ञानसम्पादनाय च रामायणगतश्लोकाः तथैव अत्र प्रदीयन्ते। अतः पाठकाः सहकुर्वन्तु।**

**दशक्रोश इतस्तात! गिरिर्यत्र निवत्स्यसि।**
**महर्षिः सेवितः पुण्यः पर्वतः सुखदर्शनः॥(अयोध्या-54 सर्गः 28 श्लो)**
**गोलाङ्गूलानुचरितो वानरक्षनिषेवितः।**
**चित्रकूट इति ख्यातो गन्धमादनसन्निभः॥ (२१. श्लो )**
**यावता चिनकूटस्य नरः श्रुङ्गाण्यवेक्षते।**
**कल्याणानि समाधत्ते न पापे कुरुते मनः॥(३०. श्लो)**
**ऋषयस्तत्र बहवो विहृत्य शरदां शतम्।**
**तपसा दिवमारूढाः कपालशिरसा सह॥(३१. श्लो)**
**प्रविविक्तमहं मत्यै तं वासां भवतस्सुखम्।**
**इह वा वनवासाय वस राम! मया सह॥(३२. श्लो)**
**रात्र्यां तु तस्यां पुष्ठायां भरद्वाजोऽब्रवीदिदम्।**
**मधुमूलफलोपेतं चित्रकूटं व्रजेति ह॥(३८. श्लो)**
**वासमौपयिकं मन्ये तव राम! महाबल।**
**नानानगगणोपेतः किन्नरोरगसेवितः॥(३१. श्लो)**
**मयूरनादाभिरुतो गजराज निषेवितः।**
**गम्यतां भवता शैलः चित्रकूटस्सविश्रुतः॥**
**पुण्यश्च रमणीयश्च बहुबूलफलायुतः॥(४०. श्लो)**
**तत्र कुञ्जरयूथानि मृगयूथानि चाभितः।**
**विचरन्ति वनान्तेऽस्मिन् तानि द्रक्ष्यसि राधव॥(४१. श्लो)**
**सरित्प्रश्रवणप्रस्थान् दरीकन्दरनिर्झरान्।**
**चरतस्सीतया सार्थं नन्दिष्यति मनस्तव॥(४२. श्लो)**
**प्रहृष्ट कोयष्टिक कोकिलस्वनैः**
**निनादितं तं वसुधाधरं शिवम्।**
**मृगैश्च मत्तैर्बहुभिश्च कुञ्जरैः**
**सुरम्यभासाद्य समावसाऽश्रमम्॥(४३. श्लो)**

❖ **अयोध्याकाण्डे ५५ पञ्चपञ्चाशत् सर्गे चित्रकूटपर्वतस्यवृक्षाः -**

**ततः प्लवेनोशुमतीं शीघ्रगामूर्मिमालिनीम्।**
**तीरजैर्बहुभिर्वृक्षैः संतेरुः यमुना नदीम्॥(२२. श्लो)**
**ते तीर्णाः प्लवमुस्तृज्य प्रस्थाय यमुनावनात्।**
**श्यामं न्यग्रोधमासेदुः शीतलं हरितच्छदम्॥(२३. श्लो)**
**न्यग्रोर्धं तगुपागम्य वैदेही वाक्यमब्रवीत्॥(२४. श्लो)**
**नमस्तेऽस्तु महावृक्ष! पारयेन्मे पतिव्रतम्।**
**कौसल्यां चैव पश्येयं सुमित्रां च यशस्विनीम्॥**
**इति सीताञ्जलिं कृत्वा पर्यगच्छद्वनस्पतिम्॥(२५. श्लो)**
**अवलोक्य ततस्सीताम् आयाचन्तीमनिन्दिताम्।**
**दयितां च विधेयां च रामो लक्ष्मणमब्रवीत्॥(२६. श्लो)**
**यद्यत् फलं प्रार्थयते पुष्पं वा जनकात्मजा।**
**तत्तत् प्रदद्या वैदेह्या यत्रायस्या रमते मनः॥(२८. श्लो)**
**गच्छतोऽस्तु तयोर्मध्ये बभूव जनकात्मजा।**
**मातंगयोर्मध्यगता शुभा नागवधूरिव॥(२९. श्लो)**
**एकैकं पादपं गुल्मं लतां वा पुष्पशालिनीम्।**
**अदृष्टपूर्वां पश्यन्ती रामं प्रपच्छ साऽवला॥(३०. श्लो)**
**रमणीयान् बहुविधान् पादपान् कुसुमोत्कटान्।**
**सीतावचनसंरब्ध आनयामास लक्ष्मणः॥**
**क्रोशमात्रं ततो गत्वा भ्रातरौ रामलक्ष्मणौ।**
**बहून् मेध्यान् मृगान् हृत्वा चेरतुर्यमुनावने॥(३३. श्लो)**

**अरण्यकाण्डे प्रथमसर्गे दण्डकारण्यगत श्लोकाः -**

**प्रविश्य तु महारण्यं दण्डकारण्यमात्मवान्।**
**ददर्श रामो दुर्धर्षः तापसाश्रममण्डलम्॥(१. श्लो)**
**शरण्यं सर्वभूतानां सुसम्मृष्टाजिरं तथा।**
**मृगैर्बहुभिराकीर्णं पक्षिसंघैः समावृतम्॥(३. श्लो)**
**पूजितं च प्रनृतं च नित्यमप्सरासां गणैः।**
**विशालैरग्निशरणैः स्रुग्भाण्डैरजिनैः कुशैः॥(४. श्लो)**
**समिद्भिस्तोयकलशैः फलमूलैश्च शोभितम्।**
**आरण्यैश्च महावृक्षैः पुण्यैः स्वादुफलैर्वृतम्॥(५. श्लो)**
**पुण्यैश्च नियताहारैः शोभितं परमर्षिभिः।**
**तद्ब्रह्मभवनप्रख्यं ब्रह्मघोषनिनादितम्।**
**ब्रह्मवद्भिर्महाभागैः ब्राह्मणैरुपशोभितम॥(८. श्लो)**
**स दृष्ट्वा राधवः श्रीमान् तापसाश्रममण्डलम्।**
**अभ्यगच्छन् महातेजा विज्यं कृत्वा महद्धनुः॥(९. श्लो)**
**मूलं पुष्पं फलं वन्यम् आश्रमं च महात्मनः।**
**निवेदयित्वा धर्मज्ञाः ततः प्राञ्जलयोऽब्रुवन्॥(१६.श्लो)**

**श्रीमद्रामायणे अरण्यकाण्डे त्रयोदशसर्गे पञ्चवटी वर्णनम् -**

**पञ्चानां वटानां समाहारः। पञ्चप्रकारवृक्षविशेषः**
**अश्वत्थबिल्ववृक्षश्च वटधात्री अशोककम्।**
**वटी पञ्चकमित्युक्तं स्थापयेत् पञ्चदिक्षु च॥**

अश्वत्थं स्थापयेत् प्राचि बिल्वमुत्तरभागतः।
वटं पश्चिमभागे तु धात्रीं दक्षिणतस्तथा।
अशोकं वह्निदिकस्थाप्यं तपस्यार्थं सुरेश्वरी॥
अगस्त्युवाच :-
इतो द्वियोजने तात! बहुमूलफलोदकः।
देशो बहुमृगः श्रीमान् पञ्चवट्यभिविश्रुतः॥
(अरण्यकाण्डः १४ सर्गः-१३ श्लो)
तत्र गत्वाऽऽश्रमपदं कृत्वा सौमित्रिणा सह।
रंस्यसे त्वं पितुर्वाक्यं यथोक्तम् अनुपालयन्॥(१४. श्लो)
वसन्तं त्वां जनाः सर्वे ज्ञास्यन्ति रघुनन्दन।
अतश्च त्वामहं ब्रूमि गच्छ पञ्चवटीमिति॥(१९. श्लो)
स हि रम्यो बनोद्देशो मैथिली तत्र रंस्यते।
स देशः श्लाधनीयश्च नाऽतिदूरे च राघव!॥(२०. श्लो)
गोदावार्याः समीपे च मैथिली तत्र रंस्यते।
प्राज्यमूलफलश्चैव नानाद्विजगणायुतः।
विविक्तश्च महाबाहो! पुण्यो रम्यस्तथैव च॥(२१. श्लो)
भवानपि सदारश्च शक्तश्च परिरक्षणे।
अपिचात्र वसन् राम! तापसान् पालयिष्यसि॥(२२. श्लो)
एतदालक्ष्यते वीर! मधूकानां महद्धनम्।
उत्तरेणास्य गन्तव्यं न्यग्रोधमभिगच्छता॥(२३. श्लो)
ततः स्थलमुपारुह्य पर्वतस्याविदूरतः।
ख्यातः पञ्चवटीत्येव नित्यपुष्पितकाननः॥(२४. श्लो)
अगस्तैनैवमुक्तस्तु रामः सौमित्रिणा सह।
सत्कृत्याऽऽमन्त्रयामास तम् ऋषिं सत्यवादिनम्॥(२५. श्लो)
तौ तु तेनाभ्यनुज्ञानौ कृतपादाभिवन्दनौ।
तदाश्रमात् पञ्चवटीं जग्मतुः सह सीतया॥(२६. श्लो)
गृहीतचापौ तु नराधिपात्मजौ
विषक्ततुणौ समरेष्वकातरौ
यथोपदिष्टेन पथा महर्षिणा
प्रजग्मतुः पञ्चवटीं समाहितौ॥(२७. श्लो)

श्रीमद्रामायणे किष्किन्धकाण्डे द्वादशसर्गे "सप्तशालभञ्जनम्" –
कृत्वेमं कार्मुकं सज्यं हस्तिहस्तमिवाततम्।
आकर्णपूर्णं आगम्य विसृजस्व महाशरम्॥
(किष्किन्धकाण्डः ११सर्गः -१३ श्लो)
इमं हि सालं सहितस्त्वया शरो
न संशयोऽत्रास्ति विदारयिष्यति।
अलं विमर्शेन मम प्रियं ध्रुवं
कुरुष्व राजात्मज शापितो मया॥(९४. श्लो)
एतच्च वचनं श्रुत्वा सुग्रीवेण सुभाषितम्।
प्रत्ययार्थं महातेजा रामो जग्राह कार्मुकम्॥
(किष्किन्धकाण्डः-12सर्गः-१. श्लो)
स गृहीत्वा धनुर्धीरं शरमेकं च मानदः।
सालमुदिश्य चिक्षेप ज्यास्वनैः पूरयन् दिशः॥(२. श्लो)
स विसृष्टो बलवता बाणः स्वर्णपरिष्कृतः।
भित्वा सालान् गिरिप्रस्थे सप्तभूमिं विवेश ह॥(३. श्लो)
तान् दृष्ट्वा सप्तनिर्भिन्नान् सालान् वानरपुंगतः।
समस्य शरवेगेन विस्मयं परमं गतः॥(5. श्लो)
स मूध्ना न्यपतद्भूमौ प्रलम्बीकृतभूषणः।
सुग्रीवः परमप्रीतो राघवाय कृताञ्जलिः॥(६. श्लो)
सेद्रानपि सुरान् सर्वान् त्वं बाणैः पुरुषर्षभ।
समर्थः समरे हन्तुं किं पुनर्वालिन प्रभो॥(८. श्लो)
येन सप्त महासाला गिरिभूमिश्च दारिताः।
वाणेनैकेन काकुत्स्थः स्थाता ते को रणाग्रतः॥(१. श्लो)
ततो रामो धनुष्पाणिः तावुभौ समुदीक्ष्यतु।
अन्योऽन्यसदृशौ वीरौ उभौ देवाविवाश्विनौ॥(१९. श्ली)
यन्नावगच्छत् सुग्रीवं वालिनं वापि शघवः।
ततो न कृतवान् बुद्धि मोक्तुमन्तकरं शरम्॥(२०. श्लो)
एतस्मिन्नन्तरे भग्नः सुग्रीवस्तेन वालिना
अपश्यन् राघवं नाथम् ऋश्यमूकं प्रदुद्रुवे॥(२१. श्लो)
कलान्तो रुधिकसिक्तांगः प्रहारैर्जर्जरीकृतः।
वालिनाऽभिद्रुतः क्रोधात् प्रविवेश महावनम्॥(२२. श्लो)
आह्वयस्वेति मामुक्त्वा दर्शयित्वा च विक्रमम्।
वैरिणा घातयित्वा च किमिदानीं त्वया कृतम्॥(२६. श्लो)
तामेव वेलां वक्तव्यं त्वया राघव तत्त्वतः।
वालिनं न निहन्मीति ततो नाहमितो व्रजे॥(२७. श्लो)
तस्य चैवं बुवाणस्य सुग्रीवस्य महात्मनः।
करुणं दीनया वाचा राघवः पुनरब्रवीत्॥(२८. श्लो)
सुग्रीव श्रूयतां तात क्रोधश्च व्यपनीयतां।
कारणं येन वाणोऽयं न मया स विसर्जितः॥(२१. श्लो)
अलङ्कारेण वेषेण प्रमाणेन गतेन च।
त्वं च सुग्रीव वाली च सदृशौ स्थः परस्परम्॥(३०. श्लो)
अभिज्ञानं कुरुष्व त्वं आत्मनो वानरेश्वर।
येन त्वाम् अभिजानीयां द्वन्द्रयुद्धमुपागतम्॥(३८. श्लो)
गजपुष्पीम् इमां फुल्लाम् उत्पाट्य शुभलक्षणाम्।
कुरु लक्ष्मण कण्ठेऽस्य सुग्रीवस्य महात्मनः॥(३१. श्लो)
ततो गिरितटे जातम् उत्पाट्य कुसुमाकुलाम्।
कुरु लक्ष्मणो गजपुष्पीं तां तस्य कण्ठे व्यसर्जयत्॥(४०. श्लो)
स तथा शुशुभे श्रीमान् लतया कण्ठसक्तया।
विपरीत इवाकाशे सूर्यो नक्षत्रमालया॥(४१. श्लो)

श्रीमद्रामायणे सुदराकाण्डे द्वितीयसर्गे लङ्कानगरवर्णनम्–वनस्पतिवैभवम्-
स सागरमना धृष्यम् अतिक्रम्य महाबलः।
त्रिकूटशिखरे लङ्कां स्थितां स्वस्थो ददर्श ह॥
(सुन्दराकाण्डः-द्वितीगसर्गः-१.श्लो)
ततः पादपमुक्तेन पुष्पवर्षेण वीर्यवान्।
अभिवृष्टः स्थितस्तत्र बभौ पुष्पमयो यथा॥(२. श्लो)

**शाद्वलानि च नीलानि गन्धवन्ति वनानि च।**
**गण्डवन्ति च मध्येन जगाम नगवन्ति च॥(६. लो)**
**शैलांश्च तरुसञ्चन्नान् वनराजीश्च पुष्पिताः।**
**अभिचकाम तेजस्वी हनुमान् प्लवगर्षभः॥(७. श्लो)**
**न तस्मिन्नचले तिष्ठन् वनान्युपननानि च।**
**स नगाग्रे च तां लङ्कां ददर्श पवनात्मजः॥(४. श्लो)**
**सरलान् कर्णिकारांश्च स्वर्जुरांश्च सुपुष्पितान्।**
**प्रियालान् मुचुलिन्दांश्च कुटजान् केतकानपि॥(९. श्लो)**
**प्रियङ्गुन् गन्धपूर्णांश्च नीपान् सप्तच्छदां स्तथा।**
**असनान् कोविदारांश्च करतीरांश्च पुष्पितान्॥(१०. श्लो)**
**पुष्पभार निबद्धांश्च तथा मुकुलितानपि।**
**पादपान् विहगाकीर्णान् पवनाधुतमस्तकान्॥(११. श्लो)**
**सन्ततान् विविधैवृक्षैः सर्वर्तुफलपुष्पितैः।**
**उद्यानानि च शम्याणि ददर्श कपिकुञ्जरः॥(१३. श्लो)**
**समासाद्य च लक्ष्मीवान् लङ्कां रावणपालिताम्।**
**परिश्वाभिः सपद्माभिः सोत्पलाभि रलङ्कृताम्॥(१४. श्लो)**

**12. श्रीमद्रामायणे सुन्दराकाण्डे अशोकवनदर्शनम् – पञ्चदशसर्गः–**

**सन्तानकलताभिश्च पादपैरुपशोभिताम्।**
**दिव्यगन्धरसोपेतांसर्वतस्समलङ्कृताम्॥**
**(सुन्द्रराकाण्डः-पञ्चदशसर्गः-२. श्लो)**
**तां स नन्दनसंकाशां मृगपक्षिभिरावृताम्।**
**हर्म्यप्रासादसम्बाद्यां कोकिलाकुलनिः स्वनाम्॥(१५ सर्गः -३. श्लो)**
**काञ्चनोत्पलपद्माभिः वपीभिरुपशोभिताम्।**
**बह्वासनकुचोपेतां बहुभूमिगृहायुताम्॥(१५ सर्गः ४. श्लो)**
**सर्वर्तुकुसुमै रम्यां फलवद्भिश्च पादपैः।**
**पुष्पितानामकोशानां श्रिया सूर्योदयप्रभाम्॥(५. श्लो)**
**विनिष्पतद्भिश्शतशः चित्रैः पुष्पावतंसकैः।**
**आमूलपुष्पनिचितैः अशोकैश्शोकनाशकैः॥(७. श्लो)**
**पुष्पभारातिभारैश्च स्पृशद्भिरिव मेदिनीम्।**
**कर्णिकारैः कुसुमितैः किंशुकैश्च शुपुष्पितैः॥(८. श्लो)**
**तथा विप्रेक्ष्यमाणस्थ वनं पुष्पितपादपम्।**
**विचिन्वतश्च वैदेहीं किञ्चिच्छेषा निशाऽभवत्॥(१८. सर्गः-१. श्लो)**
**षड्गवेदविदुषां क्रतुप्रवरयाजिनाम्।**
**शुश्राव ब्रह्मद्योषांश्च विरात्रे ब्रह्मरक्षसाम्॥(१८ सर्गः-२ श्लो)**
**वृतां पुष्परिणीभिश्च नानापुष्पोपशोभिताम्।**
**सदामदैश्च विहगैः विचित्रां परमाद्भुताम्॥(७. श्लो)**
**ईहामृगैश्च विविधैः जुष्टां दृष्टिमनोहरैः।**
**वीथीस्सम्प्रेक्षमाणश्च मणिकाञ्चनतोरणाः॥(८. श्लो)**
**नानामृगगणाकीर्णां फलैः प्रपतितैर्वृताम्।**
**अशोकवनिकामेव प्राविशत् सन्ततद्रुमाम्॥(९. श्लो)**

अशोकः इत्युक्ते नास्ति शोको यस्मात्। स्वनामाख्यातपुष्पवृक्षविशेषः। शोकनाशः, विशोकः, वञ्जुलद्रुमः, वञ्जलः, मधुपुष्पः, अपशोकः। अस्यागुणाः - शीतलत्वं, हृद्यत्वं। पित्तदाहश्रमापहत्वम्। एवं रामायणे वनस्पतिविज्ञानं बहु लभ्यते।

**श्रीमन्निगमान्तमहादेशिकविरचितस्तोत्रेषु वृक्षशब्दप्रयोगः**
**स्तोत्रम् श्लोकः श्लोकसंख्या**

1. **हयग्रीवस्तोत्रम्**यन्मूलमीदृक्....या मूलमाम्नायमहाद्रुमाणाम् ११
2. **हयग्रीवस्तोत्रम्**संचिन्तयामि प्रतिभादशास्थान् विज्ञानकल्पद्रुम-पल्लवाभं २३
3. **भगवध्यानसोपानम्** (ऊरुयुग्मवर्णनारहगनाथस्य) कामाराम-स्थिरकदलिकास्तम्भसंभावनीयम् ४
4. **दयाशतकम्** कृपणजनकल्पलतिकां कृतापराधस्य निष्क्रि-यामाद्याम् १४
5. **दयाशतकम्** रूढा वृषाचलपतेः पादे मुख्यकान्तिपत्रकच्छया। करुणे सुखयसि विनतान् कटाक्षविटपैः करापचेयफलैः॥ १९
6. **गोदास्तुतिः** श्रीविष्णुचित्तकुलनन्दनकल्पवल्लीं श्रीरङ्गराजहरिचन्दनयोगदृश्यां १
7. **अच्युतशतकम्** कल्पयसि काङ्क्षितानि कल्पद्रुम इव-श्रीकाञ्चीनलतासहितः।
न तस्य सदा फलानि निजच्छायानिर्भिन्ननित्यतापत्रिभुववनः१९
8. **रघुवीरगद्यम्** चूर्णिका - दण्डकातपोवनजङ्गमपारिजात।२८

**<u>रामायणे द्रव्यगुणाः</u>**

1. श्वदिर
2. बिल्व
3. अङ्कोल
4. शिरीष
5. सप्तपर्ण/सप्तच्छद
6. धव
7. कदम्ब। प्रियका (कदम्ब (नीप)
8. अगरू
9. लकुच
10. निम्ब
11. इंगुदी। इंगुदी मूल। इंगुदी फल
12. कीचिक(बांस)वंश। वेणव। वेणु। वेणु पुष्प
13. कुरण्ट
14. पीत सैरेयक
15. निचुल
16. कोविदार
17. अतिमुक्त। अतिमुक्तक
18. कुरुव
19. भूर्जक
20. गन्धपूर्णा
21. ताल। तालफल
22. शल्लकी
23. सर्षप
24. प्रियाल
25. किंशुक। पलाश

26. मालती
27. मल्लिका
28. अलसी
29. मधूक। मधूआ
30. रंजक
31. आम्र। चूत
32. नाग। नागकेशर। नागमाला। नागवृक्ष
33. चम्पक। चम्पा
34. बकुल
35. कदली
36. पद्म। पद्मकोश। पद्मकेशर। पद्मकिंजलक। पद्मोत्पल। पद्मालाल। पुष्कर। राजीव। शतपत्र। अम्बुज। कुरोराय। मृणाल पंकज। पुण्डरीक। अरविन्द। कमल। कमलश्वेत।(वर पैण्डरीक)
37. करवीर। तुर्णिकाशत
38. पाटलिका
39. पारिजात
40. कुमुद
41. रक्तोत्पल
42. नीलोत्पल
43. उत्पल
44. पर्णास
45. श्यामा
46. चूर्णक
47. निवार
48. तिनिश
49. केतक
50. श्वर्जुर। हिन्ताल
51. अस्वत्थ
52. तमाल
53. धन्वन
54. बन्धुजीव
55. जपापुष्प
56. माधवी-माधवीलता
57. कुटज। कुटज पुष्प
58. चिर बिल्व
59. वासन्ति
60. नलिनी। नील
61. कमल। स्थलज
62. कुन्द
63. असन
64. तगर
65. सर्ज
66. उशीर
67. शिन्दुवार
68. बदर
69. बदरी
70. तिमिद
71. पर्णकमल
72. रक्तकुश्वक
73. शल्यकर्षण
74. गजपुष्पी लता

**उपसंहारः**

एवम् अस्माकं भारतीयदर्शनेषु, काव्येषु, नाटकेषु, किमुत सर्वेषु ग्रन्थेषु वनस्पतिविज्ञानविषये महती चर्चा प्राप्तुं शक्यते एव। अस्मिन् शोधपत्रे यथामति यथाशक्ति रामायणान्तर्गतवनस्पतिविज्ञानविषय-कप्रस्तावः विहितो विद्यते। गवेषकाः एतत् शोधपत्र अवलम्ब्य इतोधिकम् अन्वेषणं विधाय कृतार्थाः भवन्तु इति शम्।

**आधारग्रन्थाः**


1. श्रीमद्रामायणम् – चौखम्बाप्रकाशनम्।
2. यजुर्वेदसंहिता – चौखम्बाप्रकाशनम्।
3. ऋग्वेदः। व्याख्या. सायणः। वैदिकसंशोधनं मण्डलम्।
4. वनस्पतिविज्ञानवैभवम्।
5. सुन्दराकाण्डम्। बाल्मीकिः। गीताप्रेसः, गोरखपुरम्।
6. मैत्रयणी संहिता। सम्पा. दामोदरसातवलेकरः। स्वाध्या-यमण्डलः।
7. भामिनीविलासः। जगन्नाथपण्डितः। व्याख्या. अच्युतरायः। निर्णयसागरप्रेसः।
8. चम्पूरामायणम्। भोजराजः। निर्णयसागरप्रेसः।